## बह्वच इञः प्राच्यभरतेषु । (६६/११४८)

बह्वचः प्रातिपदिकात् य इञ् विहितः प्राच्यगोत्रे भरतगोत्रे च [1]वर्तते, तस्य बहुषु लुग् भवति । पन्नागाराः । मन्थरैषणाः (४. १. ९५/१०९५) । भरतेषु खल्वपि –युधिष्ठिराः । अर्जुनाः (४. १. ९६/१०९६) । बह्वचः इति [2]किम् ? [3]बैकयः । [4]पौष्पयः । प्राच्यभरतेषु इति [5]किम् ? बालाकयः (४. १. ९६/१०९६) । हास्तिदासयः (४. १. ९५/१०९५) । भरताः प्राच्या एव, तेषां पुनर्ग्रहणं ज्ञापनार्थम् अन्यत्र [6]प्राग्ग्रहणे भरतग्रहणं न भवति इति । तेन 'इञः प्राचाम्' (२.४. ६०/१०८५) इति भरतानां युवप्रत्ययस्य लुग् न भवति । [7]आर्जुनिः पिता । आर्जुनायनः (४. १. १०१/११०३) पुत्रः ॥

## न गोपवनादिभ्यः । (६७/११४९)

गोपवनादिभ्यः[8] परस्य [9]गोत्रप्रत्ययस्य[10] लुग् न भवति । बिदाद्यन्तर्गणोऽयम् । [11]ततोऽञो (४. १. १०४/११०६) गोत्रप्रत्ययस्य 'यञञोश्च' (२. ४. ६४/११०८) इति लुक् प्राप्तः प्रतिषिध्यते । [12]गौपवनाः । शैग्रवाः ।

गोपवन । शिग्रु । बिन्दु । भाजन । अश्व । अवतान । श्यामाक । [13]श्वापर्ण । एतावन्त एवाष्टौ गोपवनादयः । परिशिष्टानां हरितादीनां प्रमादपाठः । ते हि चतुर्थे[14] बिदादिषु (४. १. १०४/११०६) पठ्यन्ते । तेभ्यश्च बहुषु लुग् भवत्येव, हरिताः, किंदासाः इति ॥

## तिककितवादिभ्यो द्वन्द्वे । (६८/११५०)

तिकादिभ्यः कितवादिभ्यश्च द्वन्द्वे[15] गोत्रप्रत्ययस्य बहुषु [16]लुग् भवति । [17]तैकायनयश्च कैतवायनयश्च, 'तिकादिभ्यः फिञ्' (४. १. १५४/११७८), तस्य लुक्, तिककितवाः । [18]वाङ्करयश्च भाण्डीरथयश्च, 'अत इञ्' (४. १. ९५/१०९५), तस्य लुक्, वङ्करभण्डीरथाः । औपकायनाश्च [19]लामकायनाश्च, 'नडादिभ्यः फक्' (४.१. ९९/११०१), तस्य लुक्, उपकलमकाः । पाफकयश्च नारकयश्च, 'अत इञ्' (४. १. ९५/१०९५), तस्य लुक्, पफकनरकाः । [20]बाकनखयश्च श्वागुदपरिणद्धयश्च, 'अत इञ्' (४. १. ९५/१०९५), तस्य लुक्, बकनखश्वगुदपरिणद्धाः । उब्जशब्दात् 'अत इञ्' (४.१.९५/१०९५), ककुभशब्दात् 'शिवादिभ्योऽण्' (४. १. ११२/१११५) तयोर्लुक्, [21]औब्जयश्च काकुभाश्च उब्जककुभाः । लाङ्कयश्च शान्तमुखयश्च, 'अत इञ्' (४. १. ९५/१०९५) तस्य लुक्, लङ्कशान्तमुखाः । उरसशब्दस्तिकादिषु पठ्यते, ततः फिञ्, लङ्कटशब्दाद् इञ्, तयोर्लुक्, [22]औरसायनश्च लाङ्कटयश्च उरसलङ्कटाः । भ्राष्टकयश्च कापिष्ठलयश्च, 'अत इञ्' (४. १. ९५/१०९५), तस्य लुक्, भ्रष्टककपिष्ठलाः । कार्ष्णाजिनयश्च कार्ष्णसुन्दरयश्च, 'अत इञ्' (४. १. ९५/१०९५), तस्य लुक्, कृष्णाजिनकृष्णसुन्दराः । आग्निवेश्यश्च दासेरकयश्च, अग्निवेशशब्दात् 'गर्गादिभ्यो यञ्' (४. १. १०५/११०७), दासेरकशब्दात् 'अत इञ्' (४. १. ९५/१०९५), तयोर्लुक्, अग्निवेशदासेरकाः ॥

---

1. वर्तमानस्य क. इ. 2. किमर्थम् इ. 3. चैकयः ब, वैष्कयः क, कैकेयः ह. 4. पौष्कयः ड, पौष्कराः इ, पौष्पेयः ह, पौष्यपः ब. 5. किमर्थम् इ. 6. प्राच्यग्रहणे क. ड, प्राग्ग्रहे न भवति फ. 7. अर्जुनिः पिता, अर्जुनायनिः पुत्रः क. 8. शब्देभ्यः इत्यधिकम् ड. 9. गोत्र नास्ति अ. ब. ग. 10. बहुषु इत्यधिकम् ह. 11. तत्राञो ब. ड, यत्राञो इ. 12. गोपवनाः इ. 13. श्यावर्ण ड, श्यामपर्ण फ. ह, श्यामाकपर्ण इ, श्यापर्ण्य क. 14. अध्याये इत्यधिकम् इ. 15. समासे इत्यधिकम् क. ड. 16. वर्तमानस्य इत्यधिकम् इ. ग. 17. तैकायनाश्च कैतवायनाश्च इ. 18. वाङ्कारयश्च ब, वीश्वरयश्च – वीश्वरभाण्डीरथाः इ, फांकरवयश्च ह. 19. लैमकायनाः क. 20. कानकयश्च गौदपरिणद्धयश्च कनकगुदपरिणद्धाः ड, बाकनखयश्च गौदपरिणद्धश्च बकनखगुदपरिणद्धाः इ. 21. उकयश्च काकुभाश्च उककाकुभाः इ. 22. औरगायनश्च शालंकटयनश्च उरगशलंकटाः ड. इ, °शालंकटयश्च उरसशलंकटाः क.